International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2024; 1(1): 61-65
© 2024 IJMH
www.themultijournal.com
Received: 19-04-2024
Accepted: 23-04-2024
Publish : 26-04-2024

**ज्योतिरञ्जननन्दः**
शोधछात्रः,
ज्योतिष एवं वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

**मार्गदर्शकः**
**डॉ चित्तरञ्जननायकः**
सहायकाचार्यः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**ज्योतिरञ्जननन्दः**
शोधछात्रः,
ज्योतिष एवं वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

# हस्तसञ्जीवनसिद्धज्ञाने आयुरेखादिज्ञानम्

**ज्योतिरञ्जननन्दः, डॉ चित्तरञ्जननायकः**

वेदपुरुषस्य षड्अङ्गेषु नयनत्वेन विद्यते ज्योतिषशास्त्रम् । इदम् द्युत् दीप्तौ इत्यस्मात् धातोः "द्युतेरिसन्नादेश्च जः" इति उणादिसूत्रेण धातोः इसन् प्रत्यये कृते पुनश्च धातोः आदेः दकारस्य जकारे कृते ज्युत् इसन् इति प्राप्ता , अनुबन्धलोपे कृते ततः "पुगन्तलघुपधस्य च" इत्यनेन लघुपधस्य गुणे कृते सति ज्योतिस् इति अवस्था प्राप्ता । पुनश्च "आदेशप्रत्यययोः" इत्यनेन सकारस्य स्थाने ष कारे कृते सति ज्योतिष् इति अवस्था प्राप्यते । पुनश्च ज्योतिर्नक्षत्रादि अधिकृत्य कृतो ग्रन्थः इत्यर्थे "अधिकृत्य कृते ग्रन्थे" इत्यनेन अण् प्रत्यये कृते सति पुनश्च "तद्धितेष्वचामादेः" इत्यनेन सूत्रेण आदेः अचो वृद्धौ ज्योतिष इति शब्दः निष्पन्नः । पुनश्च शास्त्रस्य विशेषणत्वात् नपुंसके ज्योतिषं इति रुपं भवति । सिद्धान्त-संहिता-होरा इति त्रयस्कन्धाः वर्तन्ते ज्योतिषशास्त्रे । होरा-संहिता स्कन्धे यत् शुभाऽशुभफलनिर्णयः क्रियते ,तस्यैव अङ्गभूतं वर्तते सामुद्रिकशास्त्रम् ।

**स्त्रीणां नृणां यत्र शुभाशभानि चिह्नानि सम्यक् प्रतिपादितानि ।**
**तद्यस्ति सामुद्रिकमङ्कितं वै शास्त्रं बुधैरवलोकनीयम् ।।**[1]

स्त्रीणां वा नृणां शरीरस्थ प्रत्यकं अङ्गं, तल्लक्षणं, रेखादीन्, तत्रस्थ शुभाशुभचिह्नानि च आधारिभूत्वा चरित्रचित्रणं येन सम्यक् प्रतिपाद्यते तच्छास्त्रं सामुद्रिकं शास्त्रमिति बुधैः प्रोक्तम् । यद्यपि हस्तरेखाशास्त्रमिति पृथक् व्यवह्रियते तथापि शास्त्रमिदं सामुद्रिकस्य एव अन्तर्भूतः । शास्त्रस्यास्य प्रसिद्धिः लोके सर्वत्र दृग्गोचरम् ।

आचार्य वराहमिहिरेण शरीरे द्वादशराशीनां कल्पना कृता । यथा-

**शीर्षमुखबाहुहृदयोदराणि कटि बस्तिगुह्यसंज्ञानि ।**
**ऊरूजानूजङ्घे चरणाविति राशयोऽजाद्याः ।।**[2]

अर्थात् शीर्ष-मुख-बाहु-हृदय-उदर-कटि-बस्ति-गुद-ऊरू-जानू-जङ्घ-चरणस्थानेषु मेषादि द्वादशराशीन् कल्पयित्वा सम्पूर्णशरीरस्य शुभाशुभत्वज्ञानं विद्वांसैः वर्णितम् ।

**कालात्मादि नकृत्मनस्तुहि नगुः सत्वं कुजो ज्ञे वचो ।**
**जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ।।**[3]

द्वादशराशीनां तथा नवग्रहाणां च स्थितिः अस्मिन् भौतिके शरीरे दृश्यते । एवञ्च प्राचीन-भारतीयज्योतिर्विद्भिः शरीरे -राशीन् ग्रहान् च कल्पयित्वा तेषां स्थित्यानुसारेण व्यक्तेः शुभाशुभफलं तथा व्यक्तित्वनिर्धारणसिद्धान्ताश्च प्रतिपादिताः ।

श्रीहस्तसञ्जीवनसिद्धज्ञानपाण्डुलिप्यां मणिबन्धरेखा-आयुरेखा-मातृरेखा-पितृरेखा-उर्ध्वरेखा-धर्मरेखा-भ्रातृभगिनीरेखा-भाग्यरेखा-मृत्युरेखा-वाहनरेखा-धर्मरेखा-स्त्रीरेखा-धनभोगरेखा-मित्रशत्रुरेखा-यात्रारेखा-तिलफलं इत्यादि विषये सविस्तरं वर्णनां विद्यते ।

श्रीहस्तसञ्जीवनसिद्धज्ञानस्य मते मणिबन्धरेखा -

**हस्तस्यादिर्मणबन्धो मणिरत्नाकरोपि च ।**
**करभोऽस्मदा कनिष्ठंसृष्ठो वक्रोऽस्तभूधरः ।।**[4]

हस्तस्य प्रारम्भस्थानस्य नाम मणिबन्धः मणिरत्नाकरश्च इति । मणिबन्धात् कनिष्ठमूलपर्यन्तं यः भागः वर्तते तत् करभः इत्युच्यते । एतस्य नाम – उष्ठः,वक्रः,अस्तभूधरः च ।

**पाणिमूलं दृढं गुठं श्लाध्यं सुश्लिष्टसन्धिकम् ।**
**श्लथं सशब्दं हीनं च निर्धनत्वादि दुखदम् ।।**[5]

यदि हस्तस्य मणिबन्धः दृढं सुव्यवस्थितं सन्धियुक्तं शब्दरहितं च भवति तर्हि उत्तममणिबन्धमित्युच्यते । विपरिते निर्धनत्वादि दुःखदश्च हीनमणिबन्धः भूयते ।

**मणिबन्धे यवोश्चेन्ये स्त्रिस्वश्चे नृपतिर्भवेत् ।**
**यदि ता पाणि पृष्ठेपि ततोधिकतरं फलम् ।।**[6]
**द्वाभ्यां च यव मालाभ्यां राजमन्त्री घनीबुधः ।**
**एकः यवपंक्त्यात् श्रेष्ठो बहुधनोर्जितः ।।**[7]

यदि मणिबन्धे त्रिणि यवचिह्नानि वर्तन्ते तर्हि, व्यक्तिः नृपः भवति। यदि सा रेखा पृष्ठेऽपि भविष्यति तर्हि ततोधिकतरं फलं प्राप्यते । यदि द्वौ यवौ स्यात् तर्हि राजमन्त्री धनी च ज्ञातव्यम् । एकैव यवः भवति चेत् प्रतिष्ठितधनवान् मन्यते ।

**वराहमिहिरेण वृहत्संहितायां उक्तं मणिबन्धलक्षणम् -**

**निगूढमणिबन्धनौ तरुणपद्मगर्भोपमौ**
**करौ नृपतियोषितस्तनुविकृष्टपर्वाङ्गुली ।**
**न निम्नमति नोन्नतं करतलं सुरेखान्वितं**
**करोत्यविधवां चिरं सुतसुखार्थसम्भोगिनीम् ।।**[8]

यासां स्त्रीणां हस्ताः नवपङ्कजसदृशाः भुत्वा तेषु सर्वाङ्गुल्यः कृशाः दुर्लभाः च भवति ,ताः स्त्रियः राजपत्यः भविष्यन्ति । यासां करतलं न गभीरं ,उच्च वा तथा सुरेखायुक्तश्चेत् , ताः स्त्रियः सौभाग्यवती, पुत्रवती ,सुखवती ,धनवती तथा सम्भोगिनी च भवति ।

डॉं. श्रीनारायणसिंहेण सम्पादितग्रन्थः सामुद्रिकरहस्यमते मणि-बन्धप्रमाणम् –

**मणिबन्धनैर्निगूढैर्दृढैश्च सुश्लिष्ट-सन्धिभिर्भूपाः ।**
**हीनैर्हस्तच्छेदः श्लथैः स-शब्दश्च निर्द्रव्याः ।।**[9]

येषां जनानां मणिबन्धाः पुष्टमांसैः निगूढाः , सुदृढाः सन्ति चेत् , राजानः भवन्ति । यदि प्रमाणात् न्युनाः भवन्ति तर्हि , हस्ताः छिद्यन्ते , यदि निर्बलीनः , शब्दहीनाः च भवन्ति चेत् , दरिद्राः भवन्ति ।

**भवन्ति रेखाः मणिबन्धदेशे तिस्रस्तदाद्या द्रविणस्य बोध्या ।**
**एवं हि शास्त्रस्य द्वितीयरेखा भक्तेस्तृतीया प्रवदन्ति विज्ञाः ।।**[10]

मणिबन्धे प्रायः तिस्रः रेखाः सन्ति । तत्र प्रथमं धनं , द्वितीयं शास्त्रज्ञानं , तृतीयं भक्तिज्ञानम् इति उच्यते विद्वांसैः ।

**एतासु स्वच्छा सरला गभीरा स्निग्धा न छिन्ना सबला भवेत् सा ।**
**तिस्रोऽधिका दैन्यविसुचिकोक्ता सर्वा विशुद्धोक्तगुणैर्विशिष्टा ।।**[11]

मणिबन्धस्य एतासु त्रयरेखासु या रेखा स्वच्छा, सरला, गम्भीरा, स्निग्धा, अभग्ना च भवति , सा रेखा बलवती इति ज्ञेयम् , तस्याः परिणामः अपि उत्तमः भवति । यदि तिसृभ्यः रेखाभ्यः अधिकं भवति चेत् , दारिद्र्यं , दुर्भाग्यं च सूचयन्ति ।

**विद्वान् धनी चारुशरीरधारी सौभाग्यशाली च सुखेन जीव्यात् ।**
**स्युः श्रृङ्खलाङ्का यदि ताः श्रमी सः द्रव्याप्तिरत्यन्तपरिश्रमात् स्यात् ।।**[12]

मणबन्धस्य रेखात्रयः यदि शुद्धतया युक्ताश्चेत् , मनुष्यः विद्वान् , धनिकः , सौभाग्यशाली भूत्वा सुखीजीवनं यापयति । रेखात्रयः यदि शृङ्खलाकारः भवति , तर्हि व्यक्तिः कर्मठः भूत्वा उद्योगं कृत्वा धनं अर्जयेत् ।

**छिन्ना यदि स्युः स नरो दरिद्रः भवेन्निरुद्योग्यलसाधिपश्च ।**
**तस्यां त्रिकोणोऽस्ति जनः परस्य धनं प्रतिष्ठां लभते च मानम् ।।**[13]

यदि तिस्रः अपि रेखाः भग्नाः सन्ति, तर्हि सः व्यक्तिः दरिद्रः, आलस्ययुक्तः, निरुद्योगी च भवति । मणिबन्धरेखायां त्रिकोणः भवति चेत् , व्यक्तिः अन्येषां धन-प्रतिष्ठा-सम्मानं च प्राप्यते ।

**स्पष्टोर्ध्वरेखा यदि छिन्न-भिन्न पापी दुरात्मा-ऽनृतभाष्यहंयुः ।**
**उत्थाय तस्मान् व्रजतीन्दुदेशम् द्वीपान्तरं याति पथा जलेन ।।**[14]

यदि एताः तिस्रः रेखाः विकीर्णाः सन्ति , उर्ध्वरेखा तैः सह संयोज्यते , तर्हि व्यक्तिः पापी , दुष्टात्मा , मिथ्यावादी , अंहकारी च भवति । यदि मणिबन्धतः कोऽपि रेखा उत्थाय चन्द्रस्थानपर्यन्तं गच्छति , तर्हि मनुष्यः जलमार्गेण द्वीपान्तरं यात्रा करिष्यति ।

**उत्थाय तस्मात्मणिबन्धदेशाद्रेखाऽपरा कृन्तति पितृरेखाम् ।**
**द्विपान्तरप्रस्थिति – कृत्यकालेयमालयं गच्छति शर्मयुक्तः ।।**[15]

यदि मणिबन्धतः उदयमानः काऽपि रेखा पितृरेखां च्छेदयति तर्हि, द्वीपान्तरं गच्छन् व्यक्तिः मृत्युं प्राप्स्यते ।

**उत्थाय तस्माद्धि बृद्धं प्रयाति विना प्रयासेन धनं लभेत ।**
**सूर्यालयं गच्छति चेत्परेण धनानि लब्ध्वा निवसेत् सुखेन ।।**[16]

मणिबन्धात् काऽपि रेखा उत्थाय बुधस्थानं गच्छति चेत् , मनुष्यः सहजतया धनं प्राप्नुयात्, रविस्थानं गच्छति चेत् , अन्येषां साहाय्येन धनं प्राप्य सुखी जीवनं यापयति ।

ऊर्ध्वरेखा लक्षणानुसार फलकथनम् –

**मध्याङ्गुलिं या मणिबन्धनोत्था रेखा गता पाणितलेऽङ्गनायाः**
**ऊर्ध्वस्थिता पादतलेऽथवा यापुंसोऽथवा राज्यसुखाय सा स्यात् ।।**[17]

यासां करतले मणिबन्धात् उत्थिता उर्ध्वरेखा मध्यमांगुलीमूलं याति, सा स्त्री राज्ञी भवति । तथा पादतले यदि उर्ध्वरेखा अस्ति तर्हि, साऽपि राज्ञी भवति । सा स्वस्य भर्तुः राज्यसुखदात्री भवति । यस्य पुरुषस्य करतले तथा पादतले उर्ध्वरेखा भवति , सः राजा भवति ।

**अङ्गुष्ठमूले प्रसवस्य रेखाः पुत्रा बृहत्यः प्रमदास्तु तन्व्यः ।**
**अच्छिन्नमध्या बृहदायुषस्ताः स्वल्पायुषां छिन्नलघुप्रमाणाः ।।**[18]

स्त्रियाः अंगुष्ठमूले सन्तानरेखाः भवन्ति ,तेषु बृहतीरेखा पुत्ररेखा इति विजानीत तथा क्षुद्ररेखा कन्यारेखा इति ज्ञेयम् । यदि रेखाः स्वच्छाः, विशालाः च सन्ति , तर्हि ताः दीर्घायुषसूचकाः सन्ति । ये रेखाः विखण्डिताः लघवः च दृश्यन्ते ताः अल्पायुषसूचकाः सन्ति ।

मणिबन्धगतरेखात्रयः तथा मत्स्यरेखाणाम् फलकथनम् –

**तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा नृपतेः ।**
**मीनयुगाङ्कितपाणिर्नित्यं सत्रप्रदो भवति ।।**[19]

यस्य मणिबन्धात् उत्थापितः तिस्रः रेखा करतलपर्यन्तं गतः , सः राजपदं प्राप्स्यते । यस्य हस्ते द्वे मीनरेखे अंकितः , सः सदा अन्नदानं करोति ।

श्रीहस्तसंजीवनसिद्धज्ञानस्य मते वर्षकल्पना –

**यावत्योङ्गुलयो लद्य मूलजीवितरेखयोः ।**
**तावत्यः शरदा ज्ञया पञ्चविंशतयो वुधैः ।।**[20]

कनिष्ठाङ्गुलीमूलतः आयुरेखायाः प्रारम्भभूत्वा यस्याङ्गुलीमूल-पर्यन्तं गच्छति तावत् पञ्चविंशतिवर्षाणि आयुः इति मन्यते । एकाङ्गुली पञ्चविंशतिवर्षाणि (२५) , द्वेङ्गुली पञ्चाशत् (५०) , त्र्यङ्गुली पञ्चसप्तति (७५) तथा चतुरङ्गुली शतवर्षाणि (१००)आयुः इति मन्यते ।

सामुद्रिकरहस्यमते वर्षकल्पना -

**एकवर्षेऽपि त्रिंशत्स्याद्विवर्षे द्विगुणं भवेत् ।**
**त्रिवर्षे चैव नवतिस्तूर्यवर्षे शताधिकम् ॥**[21]

एकवर्षस्य त्रिंशत् (३०), द्वितीयस्य षष्ठिः (६०),तृतीयस्य नवतिः(९०) ,चतुर्थस्य एकशतवर्षतः विंशत्यधिकएकशतवर्षपर्यन्तं (१००-१२०) आयुः भवति । एषा प्रत्येकं द्वयोः अंगुल्योः मध्यवर्ती वर्षसंज्ञा भवति । शतायुः इति पूर्णायुः ये मन्यन्ते तेषु मतेषु प्रत्येकं पञ्चविंशतिवर्षणां चतुर्षु भागेषु विभज्य एकशतवर्षाणि पूर्णानि भविष्यन्ति । एतेषु मतेषु एकस्याः अङ्गुल्याः मानं पञ्चविंशति-वर्षाणि भवन्ति ।

आयुरेखाविचारम् -

**त्रिविधाश्चायुषां योगाः स्वल्पायुर्मध्यमोत्तमाः**
**द्वात्रिंशत्पूर्वमल्पायुर्मध्यमायुस्ततो भवेत् ।**
**चतुःषष्ट्याः पुरस्तात्तु ततो दीर्घमुदाहृतम्**
**उत्तमायुः शतादूर्ध्वमिति शास्त्रेषु निश्चितम् ॥**[22]

आयुः त्रयः प्रकाराः सन्ति- १.दीर्घायुः, २.मध्यमायुः, ३.अल्पायुश्च। दीर्घायुः ६४ तः १०० बर्षं यावत्, मध्यमायुः ३२ तः ६४ बर्षं यावत्, अल्पायुः ३२ बर्षपर्यन्तं भवति । यदि १०० बर्षतः अधिकः भवति तर्हि उत्तमायुः इति कथ्यते ।

**कालहानिर्नयापेक्षे ज्ञेया विंशतयोऽपि च ।**
**आयुरेखा स्वरुपाच्च अल्पमृत्युर्विचार्यते।।**[23]

हस्ते आयुरेखा यदि बृहत्स्यात् तर्हि अल्पमृत्युर्भवति । एतत् आयुकालनिर्णयस्य प्राक् निश्चितं पश्येयुः ।

**आयुरेखा चतर्जन्यां तस्याष्टशतमायुषः ।**
**विद्धरेखा भवेद्यस्य लक्ष्यतेतस्य लक्षणम् ।।**
**वामेवामेत्र वेधेन जले मृत्युं समादिशेत् ।**
**रेखा सरलवेधेन शस्त्रे मृत्युं समादिशेत् ।।**
**दक्षिणे दक्षिणेवेधे वह्निसर्पभयान्मृतिम् ।**
**वामदक्षिणपार्श्वे स्याद्वेधान्मृत्युर्महारुतः ।।**[24]

अखण्डितायुरेखा यदि तर्जनीमूलयावत् गच्छति तर्हि मानवस्य अष्टाधिकशतमायुः भवति । यदि मध्ये भग्नं कर्तितं वा भवति तर्हि लक्षणानुसारं वक्तव्यम् । यदि वामतः कोऽपि वक्ररेखागत्य आयुरेखां विद्धति तर्हि जलेन मृत्युर्भविष्यति तथा सरलरेखागत्य आयुरेखां विद्धति तर्हि शस्त्रेण मृत्युर्भविष्यति । यदि दक्षिणतः कोऽपि रेखागत्य दक्षिणे आयुरेखां विद्धति तर्हि अग्निसर्पभयेन मृत्युर्भविष्यति । यदि उभयपार्श्वतः कोऽपि रेखागत्य आयुरेखां विद्धति तर्हि महारोगेण मृत्युर्भविष्यति ।

परमायुकथनम् –

**कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तरालम् ।**
**करोति रेखा परमायुषः सा प्रमाणमूना तु तदूनमायुः ।।**[25]

यस्याः स्त्रीयाः करतलस्थ कनिष्ठिकांगुलीमूलात् उत्पन्नरेखा यदि तर्जनी-मध्यमांगुली मध्ये समाप्तः , तर्हि सा परमायुः प्राप्नोति । यदि तस्याः रेखायाः न्युना भवति ,तर्हि सा अल्पायुः प्राप्नोति ।

**रेखाः प्रदेशिनीगाः शतायुषां कल्पनीयमूनाभिः ।**
**छिन्नाभिर्द्रुमपतनं बहुरेखारेखिनो निःस्वाः ।।**[26]

यदि आयुरेखा तर्जनीपर्यन्तं गच्छति , तर्हि व्यक्तिः शतं वर्षाणि जीवति । यदि न्युनं तर्हि , शास्त्रानुसारेण तस्य कल्पनम् युक्तम् । यदि च विदीर्णं भवति ,तर्हि वृक्षात् उच्चस्थानात् वा प्राणिः

**यदा सूक्ष्मगा निर्मला स्वान्तरेखा तदा शान्तचितः कृपावान्नरः स्यात् ।**
**शनिस्थानतः प्रस्थिता स्वान्तरेखा तदाऽऽनन्दभागिन्द्रियाणां नरः स्यात् ।।**[27]

यस्य हस्ते आयुरेखा सुक्ष्मा-स्पष्टा च भवति सः व्यक्तिः शान्तः,दयालुः च भवति । तथा यदा सा रेखा शनिस्थानात् चलति , तर्हि व्यक्तिः इन्द्रियाणां सुखं अनुभवति ।

**गुरुस्थानतः सौम्यगा स्याद्यदा सा मनःकष्टदा सोऽपि सन्दिग्धचितः ।**
**परस्त्रीरतः श्रृङ्खलास्वान्तरेखा सनिम्नं गुरुस्थानकं हृद्व्यथा स्यात् ।।**[28]

यदा स्वान्तरेखा(आयुरेखा) बृहस्पतिस्थानात् बुधस्थानं गच्छति तदा मनसि पीडां जनयति , तस्य पुरुषस्य मनः संशयपूर्णं भवति । यदा एषा रेखा शृङ्खला इव भवति तदा पुरुषः व्यभिचारी भवति । यदि गुरुस्थानं निच्चैः ,तर्हि हृदये वेदना भवति ।

**यदा पाण्डुरा रक्तवर्णाऽथवा सामनोमानवीयं सुवज्रानुकारी ।**
**हृदाख्याहि म्लाना समा श्रृङ्खला चेत्तदा वञ्चनावृत्तिलग्नो नरः स्यात् ।।**[29]

यदा आयुरेखा श्वेता , रक्तवर्णा च तदा वज्रवत् हृदयं भवति । यदि हृदयरेखा अस्पष्टः शृङ्खला इव च , तर्हि व्यक्तिः धूर्तः भवति ।

**हरिद्रेव गौरा हृदाख्या यदा चेत्भवेत् कालखण्डात्प्रपीडा तदानीम् ।**
**यदा कर्मरेखायुता स्वान्तरेखा भवेदर्थलुब्धश्च हिंस्रः प्रतारी ।।**[30]

यदि हृदयरेखा हरिद्रा इव गौरवर्णा भवति , तर्हि व्यक्तिः यकृतरोगेण पीडितः अस्ति । यदा स्वान्तरेखा मातृरेखायाः सह सम्बद्धा भवति तदा सःयक्तिः धनलुब्धकः हिंसकः च भवति ।

**शनिस्थानरूढा हि शाखाविहीना बलान्मृत्युदाल्पायुषो दायिका सा ।**
**गुरुस्थानजाताऽतिसूक्ष्मा यदा हृत्तदा निष्ठुरः प्राणघाती मनुष्यः ।।**[31]

यदि हृदयरेखा शनिस्थानात् उत्थिता शाखारहिता च भवति , तर्हि मनुष्याणां आयुः अल्पं भवति सहसा तथा म्रियते च । यदा एषारेखा अतीव सूक्ष्मरुपेण गुरुस्थानात् उत्थियते तदा मनुष्यः निष्ठुर-हृदययुक्तः हिंसकः च भवति ।

**अनामाङ्गुलीमूलजाताऽतिसूक्ष्मा सदा कष्टदाऽऽयासतो द्रव्यलाभः ।**
**यदा हृत्सुदीर्घा विधुस्थानमुच्चैः युता शुक्रदा पव्रितः संशरू स्यात् ।।**[32]

यदि हृदयरेखा अतीव सूक्ष्मा भूत्वा अनामिकाअंगुलीतः उत्थियते , तर्हि महती परिश्रमेण द्रव्यं प्राप्नुवन्ति । यदा एषा रेखा दीर्घा,

चन्द्रस्य स्थितिः उच्चा तथा च शुक्ररेखा अपि भवति , तर्हि स्वपत्न्याः विषये शंका भवति ।

**यदा हृद्विहीनः करः स्यान्नरस्य तदा छद्मयुक्तः निसर्गात्कुवृत्तः ।**

**यदा स्वान्तरेखा नहि स्याद्विशुद्धा तदायुः कृशं हृद्व्यथातोऽस्य मृत्युः ।।**[33]

येषां मनुष्याणां हस्तः हृदयरेखाविहीनः भवति ते कपटीनः , स्वाभाविकदुर्वृताः भवन्ति । तथा यदा स्वान्तरेखा शुद्धा न भवन्ति तदा जनानां अल्पायुः भवति , हृदयवेदनया म्रियन्ते च ।

**प्रभग्न प्रतिस्थानतो हृद्यदा स्यात्बधूद्वेषकश्चञ्चलो हृद्व्यथावान् ।**

**शनेर्गीष्पतेर्मध्यगा चेद् हृदाख्या तदाऽऽजन्मसौभाग्यशाली मनुष्यः ।।**[34]

यदा हृदयरेखा सर्वत्र छिन्ना भवति, तदा व्यक्तिः चञ्चलः, हृदयरोगी च भवति । यदा एषा रेखा शनिबृहस्पत्योः मध्यभागं गच्छति , तदा व्यक्तिः आजीवनं भाग्यशाली भवति ।

**हृदाख्याद्विशाखार्किजीवाश्रया चेत्तदा धर्ममत्तो हि मोघोद्यमी स्यात् ।**

**नहि स्वान्तशाखा गुरुस्थानगा चेत्तदा द्रव्यहीनो बुधैः कीर्तितोना ।।**[35]

यदि हृदयरेखा द्वे शाखायुक्ता भूत्वा शनिगुरुस्थानपर्यन्तं गच्छति , तर्हि मनुष्यः धर्मोन्मादी भवति तथा तस्य श्रमः अपि विफलः भवति। यदि सा रेखा गुरुस्थानपर्यन्तं न गच्छति तर्हि , मनुष्यः द्रव्यशुन्यः भवति ।

**करतलस्थ वज्र-मीनपुच्छ-शङ्खादि चिह्नानां फलकथनम् -**

**वज्राकारा धनिनां विद्याभाजां च मीनपुच्छनिभाः ।**

**शङ्खातपत्रशिविकागजाश्वपद्मोपमा नृपतेः ।।**[36]

करतलेषु वज्रचिह्नं येषां ते धनिनः, मत्स्यपुच्छचिह्नं येषां ते विद्यावन्तः , शङ्खः-छत्रः-गजः-अश्वः-पद्मं च येषां करतले स्थितः ते राजानः भवन्ति ।

कलशः-मृणालः-पताकाचिह्नानां फलकथनम् -

**कलशमृणालपताकाङ्कुशोपमाभिर्भवन्ति निधइपालाः ।**

**दामनिभाभिश्चाढ्याः स्वस्तिकरूपाभिरैश्वर्यम् ।।**[37]

करतलेषु येषां कलश-मृणाल-ध्वजाङ्कुशस्य च चिह्नं भवति ,ते धनिनः भवन्ति ।रज्जु-मालाचिह्नं येषां करतलेषु ते धनिनः । स्वस्तिकं चिह्नं हस्ते यस्य सः ऐश्वर्यं प्राप्नोति ।

श्रीहस्तसञ्जीवनसिद्धज्ञानस्य मते ध्वज-दण्डादि चिह्नफलम् –

**आतपत्रं करे यस्य दण्डेन सहितः पुनः ।**

**ध्वजो वा चामर युगं चक्रवर्ती स जायते ।। ५८ ।।**

**ध्वजो हस्ततले यस्य समृद्धत्वे सुखीभवेत् ।**

**करभां माम्सल श्रेष्ठोऽङ्गुलि पर्वतमाम्सलम् ।। ५९ ।।**[38]

येषु हस्तेषु छत्रदण्डौ च उभौ दृश्यते तथा ध्वजचामरौ वा दृश्यते ते चक्रवर्तीराजानः भवन्ति । यस्य हस्ततले ध्वजचिह्नं वर्तते सः सुखिसमृद्धवाञ्च भवति । यदि करतलः माम्सलपर्वतश्च तथा अङ्गुल्यः उत्तमाः दृश्यन्ते तर्हि जनः सुखि तथा समृद्धवान् भवति ।

**करभाभिर्गतारेखा धनरेखा यदा गता ।**

**अङ्कुशाकार भृद्यस्य स पुमान् गजवान्नृपः ।। ६० ।।**

**गजरेखा हस्तिरेखा धरोज शूराः सिंहाकृतोकरे ।**

**वृषभे गोकुलपतिः कर्षको वहुरुपवान् ।। ६१ ।।**[39]

यस्य करभात् निर्गता रेखा यदि अङ्कुशाकारभूत्वा धनरेखा प्रति गच्छति सः गजवान् राजा भवति । हस्ततले हस्तिचिह्नं यदि स्यात् तर्हि राजा , सिंहचिह्नं यदि तर्हि शूरवीरराजा ,बृषभचिह्नं यदि तर्हि गोकुलपतिः, कृषकः तथा रुपवाञ्च भवति ।

चक्र-खड्गादि चिह्नयुक्तकरतलस्य फलकथनम् –

**चक्रासिपरशुतोमरशक्तिधनुःकुन्तसन्निभा रेखाः ।**

**कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः ।।**[40]

चक्र-खड्ग-कुठारशक्ति-धनुर्मालादीनि समरेखाः हस्तेषु येषां , ते सेनापतयः भवन्ति ।

करतलस्थ मकर-ध्वजादि चिह्नफलकथनम् –

**मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः ।**

**वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन ।।**[41]

मकरः-ध्वजः-कोष्ठः-मन्दिरं इव रेखाः येषां करतलेषु सन्ति , ते धनिनः यज्ञकर्तारः वा भविष्यन्ति ।

मन्दिर-त्रिकोणादि चिह्नानां फलकथनम् –

**वापीदेवकुलाद्यैर्धर्मं कुर्वन्ति च त्रिकोणाभिः ।**

**अङ्गुष्ठमूलरेखाः पुत्राः स्युर्दारिकाः सूक्ष्माः ।।**[42]

ब्रह्मतीर्थे(अंगुष्ठमूले) वेदीचिह्नं येषां सन्ति , ते अग्निहोत्री भवन्ति । करतले येषां देवमन्दिरस्य,त्रिकोणस्य च चिह्नं दृश्यते , ते धार्मिकाः सन्ति । अंगुष्ठमूले यावन्तः बृहतीरेखाः सन्ति , तावन्तः पुत्राः जायन्ते। अपि च यावन्तः लघुरेखाः सन्ति , तावन्तः कन्याः जायन्ते।

**निष्कर्षः –**

ज्योतिषस्य सिद्धान्ताः वैदिकरीत्या लौकिकरीत्या च सर्वत्रैव महनीयः । तत्रस्थ विभागेषु सामुद्रिकशास्त्रम् अन्यतमम् । मनुष्येषु विभिन्न हस्ताकृतिकाः दृश्यन्ते । तेषां हस्ताकृतीः दृष्ट्वा तेषां स्वभावः , गतागतेषु अतीत-भविष्यतविषयेषु शास्त्रेऽस्मिन् वर्णितः । सामुद्रिकशास्त्रस्य परमं लक्ष्यं व्यावहारिकं पारमार्थिकं च । शास्त्रेस्मिन् हस्ते रेखानां स्थितिवशाच्च स्वभावनिर्धारणविधिः विमृष्टः । हस्ते अंगुष्ठा , तर्जनी , मध्यमा , अनामिका , कनिष्ठा , मणिबन्धरेखा , ऊर्ध्वरेखा , आयुरेखा , पितृरेखा इत्यादि रेखाः दृश्यन्ते । मणिबन्धे विद्यमान तिस्रः रेखाः धन , शस्त्र , भक्तिं सूचयन्ति । एतत् रुपेण अनेन शास्त्रमाध्यमेन मनुष्याणां हस्तदर्शनेन तेषां स्वभावादि वक्तुं शक्नुमः । आधुनिकशास्त्रे अस्य शास्त्रस्य उपयोगिता सर्वविदितः ।

**<u>सहायकग्रन्थसूची</u>**

1. हस्तसञ्जीवनसिद्धज्ञानम् (पाण्डुलिपिः) ।
2. बृहत्संहिता , डॉ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी , २००९ ।
3. बृहज्जातकम् , डॉँ सुरेशचन्द्रमिश्रः , रंजनपब्लिकेशन्स , दिल्ली , १९९५ ।
4. सामुद्रिकशास्त्रम् ,राधाकृष्णमिश्रा ,खेमराज् श्रीकृष्ण-दासः,श्रीवेङ्कटेश्वरस्ट्रीम् प्रेस् ,मुम्बई – ५ , १९५६ ।
5. सचित्रसामुद्रिकरहस्यम्, पं. कालिका प्रसादः, ज्योतिष-प्रकाशनम् , चौखम्बा , वारणासी ।

6. लघुपाराशरी , अच्युतानन्द झा , चौखम्बा संस्कृतसंस्थानम् , वारणासी , १९६२ ।
7. सामुद्रिकरहस्यम् , डॉ श्रीनारायण सिंहः , रुपेशठाकुर प्रसाद प्रकाशनम् , २०१४ ।
8. ज्योतिर्विज्ञानशब्दकोषः , डॉ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी ।
9. अमरकोशः , अमरः , चौखम्बा सुरभारती प्रकाशनम् , २००६ ।
10. भरतकोशः , मानवल्लि रामकृष्णकविः , तितिदे प्रकाशनम् , १९९९ ।

**संदर्भ :**

1. सामुद्रिक शास्त्र ,श्लो.सं-१
2. ल,जा-१.४
3. बृ.जा -२.१
4. ह.सं.सि –पृ.सं-६,श्लो.सं-९
5. ह.सं.सि –पृ.सं-३३,श्लो.सं-११
6. ह.सं.सि –पृ.सं-३६,श्लो.सं-३५
7. ह.सं.सि –पृ.सं-३६,श्लो.सं-३६
8. वृ.सं - पृ.सं-४७१,श्लो.सं-११
9. सा.रहस्य - पृ.सं-६१,श्लो.सं-२६
10. सा.रहस्य - पृ.सं-१४५,श्लो.सं-१
11. सा.रहस्य - पृ.सं-१४५,श्लो.सं-२
12. सा.रहस्य - पृ.सं-१४५,श्लो.सं-३
13. सा.रहस्य - पृ.सं-१४५,श्लो.सं-४
14. सा.रहस्य - पृ.सं-१४६,श्लो.सं-५
15. सा.रहस्य - पृ.सं-१४६,श्लो.सं-६
16. सा.रहस्य - पृ.सं-१४६,श्लो.सं-७
17. वृ.सं - पृ.सं-४७१,श्लो.सं-१२
18. वृ.सं - पृ.सं-४७२,श्लो.सं-१४
19. वृ.सं - पृ.सं-४४३,श्लो.सं-४४
20. ह.सं.सि –पृ.सं-३८,श्लो.सं- ६५
21. सा.रहस्य - पृ.सं-६४,श्लो.सं-३८
22. सा.रहस्य- पृ.सं-१५९,श्लो.सं- १
23. ह.सं.सि –पृ.सं-३८,श्लो.सं- ६६
24. ह.सं.सि –पृ.सं-३८,श्लो.सं- ६८,६९,७०
25. वृ.सं - पृ.सं-४७२,श्लो.सं-१४
26. सा.रहस्य - पृ.सं-६९,श्लो.सं-३७
27. सा.रहस्य - पृ.सं-१३०,श्लो.सं-१
28. सा.रहस्य - पृ.सं-१३१,श्लो.सं-२
29. सा.रहस्य - पृ.सं-१३१,श्लो.सं-३
30. सा.रहस्य - पृ.सं-१३१,श्लो.सं-४
31. सा.रहस्य - पृ.सं-१३१,श्लो.सं-५
32. सा.रहस्य - पृ.सं-१३२,श्लो.सं-६
33. सा.रहस्य - पृ.सं-१३२,श्लो.सं-७
34. सा.रहस्य - पृ.सं-१३२,श्लो.सं-८
35. सा.रहस्य - पृ.सं-१३३,श्लो.सं-९
36. वृ.सं - पृ.सं-४४३,श्लो.सं-४५
37. वृ.सं - पृ.सं-४४३,श्लो.सं-४६
38. ह.सं.सि –पृ.सं-४७,श्लो.सं- ५८,५९
39. ह.सं.सि –पृ.सं-४७,श्लो.सं- ६०,६१
40. वृ.सं - पृ.सं-४४३,श्लो.सं-४७
41. वृ.सं - पृ.सं-४४३,श्लो.सं-४८
42. वृ.सं - पृ.सं-४४३,श्लो.सं-४९